## कर्तृकरणे कृता बहुलम् । (३२/६९४)

तृतीया इति वर्तते । कर्तरि करणे [1]च या तृतीया तदन्तं[2] कृदन्तेन सह बहुलं समस्यते, तत्पुरुषश्च समासो भवति[3]। सर्वोपाधिव्यभिचारार्थं बहुलग्रहणम् । कर्तरि —— अहिना हतः अहिहतः[4] । करणे —— [5]नखैर्निभिन्नः नखनिर्भिन्नः । [6]परशुना छिन्नः । कर्तृकरणे इति किम् ? भिक्षाभिरुषितः[7] । बहुलग्रहणं किम् ? दात्रेण लूनवान्, परशुना छिन्नवान्[8], [9]इह समासो न भवति । पादहारकः, गले चोपकः (म.भा.१.३८६) इति [10]च भवति ॥

## कृत्यैरधिकार्थवचने । (३३/६९५)

स्तुतिनिन्दाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनम् । [11]कर्तृकरणयोः [12]या तृतीया तदन्तं सुबन्तं कृत्यैः सह समस्यतेऽधिकार्थवचने गम्यमाने [13]विभाषा, तत्पुरुषश्च समासो भवति । [14]कर्ता – काकपेया (३.१.९७/२८४२) नदी । श्वलेह्यः (३.१.१२४/२८७२) कूपः । [15]करणम् – बाष्पच्छेद्यानि तृणानि । कण्टकसञ्चेय ओदनः । पूर्वस्यैवायं प्रपञ्चः ।

[७७] कृत्यग्रहणे यण्ण्यतो[16]र्ग्रहणं कर्तव्यम् ।

इह मा भूत्, काकैः पातव्या [17]इति ॥

## अन्नेन व्यञ्जनम् । (३४/६९६)

तृतीया इति वर्तते । व्यञ्जनवाचि[18] [19]तृतीयान्तमन्नवाचिना सुबन्तेन सह समस्यते, [20]विभाषा तत्पुरुषश्च समासो भवति । संस्कार्यमन्नं, संस्कारकं व्यञ्जनम् । दध्ना उपसिक्त ओदनः दध्योदनः । [21]क्षीरौदनः । [22]वृत्तौ क्रियाया अन्तर्भावादन्नव्यञ्जनयोः सामर्थ्यम् ॥

## भक्ष्येण मिश्रीकरणम् । (३५/६९७)

[23]मिश्रीकरणवाचि तृतीयान्तं [24]भक्ष्यवाचिना सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । खरविशदमभ्यवहार्यं भक्ष्यं, तस्य संस्कारकं मिश्रीकरणम् । गुडेन मिश्राः धानाः गुडधानाः । गुडपृथुकाः । वृत्तौ क्रियाया अन्तर्भावात् पूर्वोत्तरपदयोः सामर्थ्यम् ॥

---

1. च नास्ति फ. 2. शब्दरूपं इत्यधिकम् ह. 3. इति इत्यधिकम् ब. क. इ. फ. 4. रुद्रहतः इत्यधिकम् ड. फ. ह, महाराजहतः इत्यधिकम् क. 5. नरवैर्भिन्नः इत्यधिकम् ड. ह, दन्तभिन्नः क. 6. उदाहरणमिदं नास्ति फ. 7. हेतौ तृतीया इत्यधिकम् क.इ. 8. इति इत्यधिकम् फ. 9. इत्यत्र ह. 10. च नास्ति ह. 11. कर्तृकरणे कृत्यैः सह समस्येते क.ड.इ.ह. 12. या नास्ति फ. 13. विभाषा नास्ति ह. 14. कर्तरि ड. फ. ह. 15. करणे क. ड. इ. ह. 16. ग्रहणं कर्तव्यम् नास्ति फ, कर्तव्यम् नास्ति ड, वार्त्तिकमिदं नास्ति ह. 17. इति नास्ति ड.फ. 18. यत् इत्यधिकम् ड. 19. तृतीयान्तं तद् फ. 20. विभाषा नास्ति ड. ह. 21. क्षीरोदनः ब. 22. कृतौ ब. 23. तृतीया इत्येव इत्यधिकम् ड. 24. तद् इत्यधिकम् फ.